द्वितीयभागः

तृतीयः पाठः

# ३. साहसबालकः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रं कं सन्दर्भं सूचयति?
२. चित्रे कः कार्यक्रमः प्रचलति।
३. चित्रे बालबालिकाः किमर्थं गजौ आरूढवन्तः?



**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**



प्रेमनगरम् इति ग्रामः उत्तराखण्डराज्ये अस्ति। तस्मिन् जनपदे एकः केन्द्रीयविद्यालयः अस्ति। प्रियांशुजोशी इति एकः दशवर्षीयः बालकः, तस्य भगिनी च तस्मिन् विद्यालये पठतः।

सः २००९तमवर्षस्य जुलैमासस्य प्रथमदिनाङ्कः। मध्याह्ने विद्यालयस्य विरामः आसीत्। प्रियांशुः भगिन्या सह गृहं गच्छति स्म। मार्गे हठात् एकः चित्रकः आगच्छत्। अकस्मात् तस्य भगिन्याः उपरि आक्रमणम् अकरोत्। तेन बालिकायाः कण्ठे स्कन्धे च आघाताः अभवन्।

प्रियांशुः तूष्णीं न स्थितवान्, पुस्तकस्यूतेन चित्रकं ताडयितुम् आरब्धवान् च। चित्रकः तां बालिकाम् अत्यजत्। परन्तु प्रियांशोः उपरि आक्रमणम् अकरोत्। प्रियांशुः उच्चैः स्वरेण आक्रन्दनम् कृतवान्। मार्गस्थाः जनाः तस्य आक्रन्दान् श्रुत्वा वेगेन आगत्य चित्रकात् तौ बालौ रक्षितवन्तः।

SCERT TELANGANA








भारतसर्वकारः प्रियांशोः धैर्यस्य प्रशंसाम् अकरोत्। भारतप्रधानमन्त्री, ''सञ्जयचोप्रा राष्ट्रियवीरतापुरस्कारेण'' प्रियांशुं पुरस्कृतवान्।

बालाः! पश्यन्तु, दशवर्षीयस्य बालस्य धैर्यम्! भारतसर्वकारः एवं धैर्यं, साहसं प्रदर्शितवतः बालान् सम्मानयति। तेषां विद्याभ्यासाय उत्तमसाहाय्यं च करोति।





राष्ट्रपतिना साकं २०१० तमवर्षस्य साहसबालपुरस्कारग्रहीतारः



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठ्यांशचित्रे कानि कानि सन्ति?

आ. प्रियांशोः साहसम् उद्दिश्य स्वीयवाक्यैः वदन्तु।

इ. प्रियांशुः केन कारणेन चित्रकं प्रतिघटितवान्?

ई. भवती/भवान् कदापि साहसं प्रदर्शितवती/प्रदर्शितवान् वा? कस्मिन् सन्दर्भे?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. पाठ्यचित्रे के के किं किं कुर्वन्ति?

आ. पाठे प्रियांशु-चित्रकशब्दौ कतिवारम् आगतौ?

इ. पाठे केषाञ्चनपदानाम् अन्ते 'ति' - 'वान्' - 'तु' इति अक्षराणि सन्ति। तादृशपदानि लिखन्तु। तेषाम् अर्थान् अवगच्छन्तु।

ई. पाठे एकम् अक्षरं सर्वत्र व्यतिरेकार्थं सूचयति। तत् अन्विष्य लिखन्तु। कस्य पदस्य अग्रे तत् भवति इति पश्यन्तु।

उ. अत्र कानिचन वाक्यानि सन्ति। तानि पठित्वा व्यतिरेकाक्षरम् उपयुज्य वाक्यानि व्यतिरेकभावेन लिखन्तु।

उदा : प्रियांशोः भगिनी चित्रकं दृष्ट्वा उच्चैः हसति।

प्रियांशोः भगिनी चित्रकं दृष्ट्वा उच्चैः **न** हसति।

१. प्रियांशुः चित्रकं दृष्ट्वा पलायनं कृतवान्।
२. प्रियांशुः दण्डेन चित्रकं ताडितवान्।
३. मार्गस्थजनाः चित्रकं मारयन्ति।

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. प्रियांशुः कस्मिन् राज्ये वसति?
२. सः कुत्र पठति?
३. प्रियांशुः चित्रकं कथं प्रतिघटितवान्।
४. साहसबालानां कृते कीदृशपुरस्कारः दीयते?



### आ. चिन्तयन्तु, लिखन्तु

१. प्रियांशोः साहसम् उद्दिश्य पञ्चवाक्यानि लिखन्तु?
२. साहसं केषु सन्दर्भेषु प्रदर्शनीयम्?
३. प्रियांशुः पुस्तकस्यूतेन चित्रकं ताडितवान्। चित्रकात् रक्षणं प्राप्तुम् अन्यम् उपायं सूचयन्तु।
४. प्रियांशुं प्रधानमन्त्री अभिनन्दति। यदि भवती/भवान् एव प्रधानमन्त्री भवति चेत् तस्यां सभायां प्रियांशोः साहसकार्यविषये किं वदति?


## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. 'कारः' इति पदस्य अग्रे कोष्ठकस्थान् उपसर्गान् संयोज्य पदानि रचयन्तु।

| आ, वि, प्रा, अधि, निरा, प्र, उप, अप |
|---|

उदा : आकारः




...................... ......................

...................... ......................

...................... ......................

......................

SCERT TELANGANA

आ. वाक्यानि पठन्तु, रेखाङ्कितपदानाम् अर्थं जानन्तु। वाक्यानां भावम् अवगच्छन्तु। वदन्तु।



१. माता ''भोजनं कुर्वन्तु'' इति वदति।
जनकः ''दूरदर्शनं (टी.वी.) मा पश्यन्तु'' इति आज्ञां करोति।

२. मम गृहे एकः आसन्दः अस्ति। तस्य उपरि पत्रसूची अस्ति।
मातुलः आगत्य तस्य उपरि उपविशति।

३. मार्गे फलविक्रेता ''आम्रफलानि, दाडिमफलानि, बदरीफलानि'' इति उच्चैः वदति।
गृहे बालः अपि ''आम्मपलानि, दाडिपलानि, बद्दनीफ्लानि'' इति उच्चैः अनुवदति।

## ५. व्याकरणांशाः



अ. अधः दत्तानि वाक्यानि पठन्तु। रेखाङ्कितपदानाम् अर्थान् अवगच्छन्तु।

१. उत्तराखण्डराज्ये प्रेमनगरम् इति ग्रामः अस्ति।
२. प्रियांशुः विद्यालये पठति।
३. विद्यालयस्य विरामः मध्याह्ने आसीत्।
४. एकः चित्रकः मार्गे आगतः।

☞ उपरितनवाक्येषु रेखाङ्कितानि पदानि सप्तमीविभक्तेः रूपाणि।

आ. उपरि दत्तानि रेखाङ्कितपदनि दृष्ट्वा अधस्थे आवरणे दत्तं पदं समीचीनार्थे परिवर्त्य लिखन्तु।

नवीनः रेल्यानम् आरूढवान्। रेल् (यानम्) ...................... बहवः जनाः सन्ति। नवीनस्य (हस्तः) ........................... स्यूतः अस्ति। तस्मिन् (स्यूतः) ........................... तस्य युतकम् अस्ति। तस्मिन् (युतकं) .................... धनम् अस्ति। नवीनः (मध्याह्नम्) ............................ निद्रितवान्। धनं नष्टम्।

इ. पदानि पठन्तु, अदृष्ट्वा लिखन्तु, समीक्षां कुर्वन्तु।

| | | | |
|---|---|---|---|
| दशवर्षीयः | गृहम् | आक्रमणम् | श्रुत्वा |
| दिनाङ्कः | भगिनी | पुरस्कारः | सर्वकारः |

ई. अधः दत्तानि वाक्यानि पठन्तु।

प्रियांशोः विद्यालयस्य विरामः आसीत्।
चित्रकः आक्रमणम् अकरोत्।
चित्रकः बालिकाम् अत्यजत्।

→ रेखाङ्कितानि एतानि पदानि भूतकालिकक्रियापदानि।

SCERT TELANGANA

उ. तथैव वर्तमान-भूत-भविष्यत्कालयोः क्रियापदानां वाक्यानि पठित्वा तेषां भेदान् जानन्तु।

| | | |
|---|---|---|
| सः चन्दमामां पठति। | सा भोजनं करोति। | रेलूयानं गच्छति। |
| सः चन्दमामाम् अपठत्। | सा भोजनम् अकरोत्। | रेलूयानम् अगच्छत्। |
| सः चन्दमामां मध्याह्ने पठिष्यति। | सा भोजनं सायङ्काले करिष्यति। | रेलूयानं गमिष्यति। |

ऊ. वाक्यानि पठन्तु। रेखाङ्कितपदानि परिशीलयन्तु।

राजेशः गृहे अस्ति। सः विद्यालयं न आगच्छति। सः रात्रौ ग्रामं गमिष्यति। तस्य सोदरी रेखा। सा बुद्धिमती। तस्याः द्विचक्रिका अस्ति। सा बहु पुरातनी। तस्याः एकं चक्रं नास्ति।

**नामवाचकस्य स्थाने यानि पदानि सन्ति, तानि सर्वनामानि। पाठतः सर्वनामानि चित्वा लिखन्तु।**

ऋ. अधः दत्तानि पदानि पठन्तु। एतानि सप्तमीविभक्तेः रूपाणि।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **पुंलिङ्गे** | राज्ये | राज्ययोः | राज्येषु |
| | जनपदे | जनपदयोः | जनपदेषु |
| | विद्यालये | विद्यालययोः | विद्यालयेषु |
| **स्त्रीलिङ्गे** | लतायां | लतयोः | लतासु |
| | तुलायां | तुलयोः | तुलासु |
| | गायिकायां | गायिकयोः | गायिकासु |
| **नपुंसकलिङ्गे** | फले | फलयोः | फलेषु |
| | भवने | भवनयोः | भवनेषु |
| | नगरे | नगरयोः | नगरेषु |

३. अधः दत्तानि विभिन्नधातूनां भूतकाललकार-क्तवतुप्रत्ययान्तरूपाणि पठन्तु। रूपद्वयमपि भूतकालस्य अर्थं बोधयति । एतानि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| **वर्तमानकाले** | **लकार रूपाणि भूतकाले** | **क्तवतुप्रत्ययान्तरूपाणि पुंलिङ्गे** | **स्त्रीलिङ्गे** | |
|---|---|---|---|---|
| वदति | अवदत् | उक्तवान् | उक्तवती | (ए.व) |
| | अवदन् | उक्तवन्तः | उक्तवत्यः | (ब.व) |
| पठति | अपठत् | पठितवान् | पठितवती | (ए.व) |
| | अपठन् | पठितवन्तः | पठितवत्यः | (ब.व) |

| | | | | |
|---|---|---|---|---|
| लिखति | अलिखत् | लिखितवान् | लिखितवती | (ए.व) |
| | अलिखन् | लिखितवन्तः | लिखितवत्यः | (ब.व) |
| नयति | अनयत् | नीतवान् | नीतवती | (ए.व) |
| | अनयन् | नीतवन्तः | नीतवत्यः | (ब.व) |

**एवम् अन्यक्रियापदानि अध्यापकस्य साहाय्येन अवगच्छन्तु।**

## ६. सर्जनात्मकव्यक्तीकरणम्



**पाठे वर्णितां साहसघटनां कथारूपेण लिखन्तु।**

## ७. परियोजनाकार्यम्



**अ. राष्ट्रपतिपुरस्कारग्रहीतॄणां साहसबालबालिकानां छायाचित्राणि सङ्कलयन्तु।**
**आ. तेषां साहसकार्याणि चित्रीकृत्य भित्तिपत्रिकायां लेपयन्तु।**

## ८. प्रशंसा



अध्यापकः - रमेश! कृष्ण! गोपाल! भवन्तः किमर्थं विलम्बेन कक्ष्याम् आगतवन्तः?

रमेशः - श्रीमन्? गोपालम् एकः भयङ्करः शुनकः अनुधावितवान्। एषः भीतः अभवत्। तस्मात् शुनकात् गोपालं रक्षित्वा वयम् आगतवन्तः। अतः आगमने विलम्बः अभवत्।

अध्यापकः - उत्तमं कार्यं कृतवन्तः।
(बालाः! एतादृशपरिस्थितौ भवन्तः किं कुर्वन्ति?)





**स्वीयमूल्याङ्कनम्**

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. प्रियांशोः साहसम् उद्दिश्य वक्तुं शक्नोमि । | | | |
| ३. साहसं केषु सन्दर्भेषु प्रदर्शनीयम् इति लेखितुं शक्नोमि। | | | |
| ४. पाठे वर्णितां साहसघटनां कथारूपेण लेखितुं शक्नोमि । | | | |

SCERT TELANGANA